वीरस्य भेदने यथाकालं प्रायश्चित्तं कुर्यात् । तत्प्रायश्चित्तप्रकारादि । अभङ्गेन द्वितीयतृतीययोर्मध्ये द्वयेनान्यतरेण वा प्रवर्ग्यं चरेत् । तत्र पूर्णाहुतिहोमप्रकारः । संभ्रियमाणो महावीरो यदि भिद्यते तदा प्रायश्चित्तहोमे प्रजापतिर्देवता । निष्ठिताभिमर्शनादारभ्य अजापयोऽवसेचनान्तकाले महावीरभेदने प्रायश्चित्तभेदः । तत्र प्रथमदिने भेदने प्रा० सविता देवता । द्वितीयेऽहनि भेदे अग्निर्देवता तृतीयदिने भेदने वायुर्देवता ।

अथ प्रवर्ग्याधिकारिणः । अग्निष्टोमस्याद्यसंस्थातिरात्रस्य प्रथमे प्रयोगे न प्रवर्ग्यचरणम् इत्येकः पक्षः । विकल्पेन तत्रापि प्रवर्ग्यचरणमिति शाखान्तरम् । सप्रवर्ग्ये क्रतौ दधिघर्मसम्बन्धिनीतिकर्त्तव्यता । सपवित्रायामग्निहोत्रहवन्यां दधिघर्मग्रहणं कुर्यात् । तच्च यथाकथञ्चित् स्थालीमुखेनैव स्रुचि निनयेत् । प्रस्तरणाभिघारणे अपत्र न । हुतशेषस्य “मयि त्यदिति” मन्त्रेण भक्षणम् । तच्च महाव्रतीयेऽह्नि कर्त्तव्यम् । दधिभक्षानन्तरं चात्वाले मार्ज्जनम् । प्रवर्ग्यचरणस्यादौ अन्ते च शान्तिकाध्यायपाठः । (शान्तिकाध्यायश्च ऋचं वाचमित्याद्यध्यायः) । शान्तिकरणद्वयमध्ये द्वारपिधानोत्तरकाले आदिमम् । पात्राणामासन्द्यां निधानानन्तरमन्तिमम् इति भेदः ।

कातीयगृह्यसूत्रप्रतिपाद्यविषयाश्च विस्तरभयान्नात्रोक्तास्तत एवासेयाः । कात्यायनसर्व्वानुक्रमणिकाप्रतिपाद्यविषयाश्च सर्व्वानुक्रमणिकाशब्दे वक्ष्यन्ते ।

**कात्यायनी** स्त्री कतस्य गोत्रापत्यं स्त्री गर्गा० यञ् लोहितकतन्ता० ष्फः षित्त्वात् ङीष् । १ कतगोत्रापत्यस्त्रियाम् । पत्न्यां ङीष् । २ कात्यायनर्षेः पत्न्याम् ३ तत्तुल्य कषायादिवस्त्रधारिण्यामर्द्धवृद्धायां विधवायां स्त्रियां ४कल्पभेदे कतगोत्रोत्पन्नायां दुर्गायां ५ याज्ञवल्क्यर्षिपत्नीभेदे च । “याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः मैत्रेयी कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी” वृ० उ० । [ यके शिवप्रणीते तन्त्रभेदे ।

**कात्यायनीतन्त्र** न० ६त० । कात्यायनीपूजामन्त्रादिविधा-

**कात्यायनीपुत्र** पु० ६त० । कार्त्तिकेये ।

**काथक्य** पु० स्त्री कथकस्य गोत्रापत्यं गर्गा० यञ् । कथकर्षेर्गोत्रापत्ये यूनि तु यञन्तत्वात् फक् । काथक्यायन तदीय युवगोत्रापत्ये । स्त्रियां लोहितकतान्तादि० ष्फः षित्त्वात् ङीष् । काथक्यायनी तद्गोत्रापत्यस्त्रियाम् ।

**काथञ्चित्क** न० कथञ्चित्+विनयादि० स्वार्थे ठक् तान्तत्वात् ठस्य कः । कथञ्चिदित्यर्थे ।

**काथिक** त्रि० कथायां साधु कथादि० ठक् । कथारचनासमर्थे

**कादम्ब** पु०स्त्री सौ०कदि–णिच्–अम्बच् । (बालिहाँस) १हंसभेदे स्त्रियां जातित्वेऽपि संयोगोपधत्वान्न ङीष् किन्तु टाप् । तस्य च नीलवर्णत्वम् “क्वचित् खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः” सितासितगङ्गायमुनासंगमवर्णने रघुः । तद्व्या० “कादम्बसंसर्गवती नीलहंससंसृष्टा” मल्लि० । सुश्रुते हंससारसेत्युपक्रमे कादम्बस्य प्लवत्वं संघचारित्वञ्चोक्त्वा “रक्तपित्तहराः शीताः स्निग्धा वृष्या मरुज्जितः । सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः” इति तेषां मांसगुणा उक्ताः । २इक्षौ पु० विश्वः । ३वाणे मेदि० । “कादम्बानामेकपातैरसीव्यत्” माघः । कदम्बे समूहे भवः अण् । ५ समूहभवे त्रि० । कदम्बस्येदम् अण् । ६कदम्बसम्बन्धिनि त्रि० “कादम्बमर्द्धोद्गतकेशरञ्च” रघुः । “कादम्बं नीपकुसुम”मिति मल्लि० । वस्तुतः कदम्बशब्दस्य पुष्पपरत्वे कदम्बमित्येव ह्रस्वपाठः स्यात् दीर्घपाठे तु कदम्बानां कुसुमानां समूह इत्यर्थेऽण् । इति तस्य कदम्बसमूहपरतेति बोध्यम् । कदम्ब एव स्वार्थेऽण् । ७ कदम्बवृक्षे पु० “वेत्रकादम्बवल्लजकरम्भमहाकरम्भाः पञ्च पुष्पविषाणि” स्थावरविषकीर्त्तने सुश्रु० । स्वार्थे कन् वाणे हारा० ।

**कादम्बर** न० कादम्बं लाति प्रकृतित्वेन ला–क लस्य रः । १ऐक्षवे गुडादौ, तस्य २विकारे मद्ये च । “निषेव्य मधु माधवाः सरसमत्र कादम्बरम्” माघः । तद्व्याख्यायां मल्लिनाथेनोक्ता व्युत्पत्तिरुक्ता । कादम्बं कदम्बोद्भवं रसं राति रा–क । तत्तुल्यरसयुक्ते ३दधिसरे पु० मेदि० ।

**कादम्बरी** स्त्री कुत्सितं मलिनमम्बरं यस्य कोः कदादेशः कदम्बरो लीलाम्बरो बलभद्रस्तस्य प्रिया अण् । हलिप्रियायाम्, मदिरायाम् । अस्यानिरुक्तिर्बलभद्रप्रियता च हरि० ९८ अ० दर्शिता यथा “अथ सङ्कर्षणः श्रीमान् विना कृष्णेन वीर्य्यवान् । चचार तस्य शिखरे नगस्य नगसन्निभः । प्रफुल्लस्य कदम्बस्य प्रच्छाये निषसाद ह । वायुना मदगन्धेन वीज्यमानः सुखेन वै । तस्य तेनानिलौघेन सेव्यमानस्य तत्र वै । मदसंस्पर्शजो गन्धः संस्पृशन् घ्राणमागतः । तृष्णा चैनं विवेशाशु वारुणीप्रभवा तदा । शुशोष च मुखं तस्य मत्तस्येवापरेऽहनि । स्मारितः स पुरावृत्तमवृतप्राशनं